# શ્રીસરસ્વતીરહસ્યોપનિષત્

Shri Sarasvatirahasya Upanishad

sanskritdocuments.org

January 10, 2019

# Shri Sarasvatirahasya Upanishad

# શ્રીસરસ્વતીરહસ્યોપનિષત્

## Sanskrit Document Information

Text title : Sarasvatirahasya Upanishad

File name : sarasvati_upan.itx

Category : upanishhat, upanishad

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi (sunderh at hotmail.com)

Proofread by : Sunder Hattangadi (sunderh at hotmail.com)

Description-comments : 106 / 108; Krishna Yajurveda - Shakta upanishad

Latest update : April 25, 2000

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

January 10, 2019

*sanskritdocuments.org*

# શ્રીસરસ્વતીરહસ્યોપનિષત્

પ્રતિયોગિવિનિર્મુક્તબ્રહ્મવિદ્યૈકગોચરમ્ ।
અખણ્ડનિર્વિકલ્પં તદ્રામચન્દ્રપદં ભજે ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ પ્રતિષ્ઠિત-
માવિરાવીર્મ એધિ ॥ વેદસ્ય મ આણીસ્થઃ શ્રુતં મે
પ્રહાસીરનેનાધીતેનાહોરાત્રાન્સન્દધામિ ઋતં વદિષ્યામિ
સત્યં વદિષ્યામિ તન્મામવતુ અવતુ મામવતુ વક્તાર-
મવતુ વક્તારમ્ ॥ ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ ઋષયો હ વૈ ભગવન્તમાશ્વલાયનં સમ્પૂજ્ય
પપ્રચ્છુઃ કેનોપાયેન તજ્જ્ઞાનં તત્પદાર્થાવભાસકમ્ ।
યદુપાસનયા તત્ત્વં જાનાસિ ભગવન્વદ ॥ ૧॥

સરસ્વતી દશશ્લોક્યા સઋચા બીજમિશ્રયા ।
સ્તુત્વા જપ્ત્વા પરાં સિદ્ધિમલભં મુનિપુઙ્ગવાઃ ॥ ૨॥ ઋષય ઊચુઃ ।
કથં સારસ્વતપ્રાપ્તિઃ કેન ધ્યાનેન સુવ્રત ।
મહાસરસ્વતી યેન તુષ્ટા ભગવતી વદ ॥ ૩॥

સ હોવાચાશ્વલાયનઃ । અસ્ય શ્રીસરસ્વતીદશશ્લોકીમહામન્ત્રસ્ય ।
અહમાશ્વલાયન ઋષિઃ । અનુષ્ટુપ્ છન્દઃ । શ્રી વાગીશ્વરી દેવતા ।
યદ્વાગિતિ બીજમ્ । દેવીં વાચમિતિ શક્તિઃ । પ્રણો દેવીતિ કીલકમ્ ।
વિનિયોગસ્તત્પ્રીત્યર્થે । શ્રદ્ધા મેધા પ્રજ્ઞા ધારણા વાગ્દેવતા
મહાસરસ્વતીત્યેતૈરઙ્ગન્યાસઃ ॥ નીહારહારઘનસારસુધાકરાભાં
કલ્યાણદાં કનકચમ્પકદામભૂષામ્ । ઉત્તુઙ્ગપીનકુચકુમ્ભ-
મનોહરાઙ્ગીં વાણીં નમામિ મનસા વચસા વિભૂત્યૈ ॥ ૧॥

ૐ પ્રણોદેવીત્યસ્ય મન્ત્રસ્ય ભરદ્વાજ ઋષિઃ । ગાયત્રી છન્દઃ ।
શ્રીસરસ્વતી દેવતા । પ્રણવેન બીજશક્તિઃ કીલકમ્ । ઇષ્ટાર્થે વિનિયોગઃ ।
મન્ત્રેણ ન્યાસઃ ॥ યા વેદાન્તાર્થતત્ત્વૈકસ્વરૂપા પરમાર્થતઃ ।

નામરૂપાત્મના વ્યક્તા સા માં પાતુ સરસ્વતી ॥ ૐ પ્રણો દેવી સરસ્વતી
વાજેભિર્વાજિનીવતી ॥ ધીનામવિત્ર્યવતુ ॥ ૧॥

આ નો દિવ ઇતિ મન્ત્રસ્ય અત્રિરૃષિઃ । ત્રિષ્ટુપ્ છન્દઃ ।
સરસ્વતી દેવતા । હ્રીમિતિ બીજશક્તિઃ કીલકમ્ । ઇષ્ટાર્થે
વિનિયોગઃ । મન્ત્રેણ ન્યાસઃ ॥ યા સાઙ્ગોપાઙ્ગવેદેષુ
ચતુર્ષ્વેકૈવ ગીયતે । અદ્વૈતા બ્રહ્મણઃ શક્તિઃ સા માં
પાતુ સરસ્વતી ॥ હ્રીં આ નો દિવો બૃહતઃ પર્વતાદા સરસ્વતી
યજતાગં તુ યજ્ઞમ્ । હવં દેવી જુજુષાણા ઘૃતાચી
શગ્માં નો વાચમુશતી શ્રુણોતુ ॥ ૨॥

પાવકા ન ઇતિ મન્ત્રસ્ય । મધુચ્છન્દ ઋષિઃ । ગાયત્રી
છન્દઃ । સરસ્વતી દેવતા । શ્રીમિતિ બીજશક્તિઃ કીલકમ્ ।
ઇષ્ટાર્થે વિનિયોગઃ । મન્ત્રેણ ન્યાસઃ ॥ યા વર્ણપદવાક્યાર્થ-
સ્વરૂપેણૈવ વર્તતે । અનાદિનિધનાનન્તા સા માં પાતુ
સરસ્વતી ॥ શ્રીં પાવકા નઃ સરસ્વતી વાજેભિર્વાજિનીવતી । યજ્ઞં
વષ્ટુ ધિયા વસુઃ ॥ ૩॥

ચોદયિત્રીતિ મન્ત્રસ્ય મધુચ્છન્દ ઋષિઃ । ગાયત્રી છન્દઃ ।
સરસ્વતી દેવતા । બ્લૂમિતિ બીજશક્તિઃ કીલકમ્ । મન્ત્રેણ ન્યાસઃ ॥

અધ્યાત્મમધિદૈવં ચ દેવાનાં સમ્યગીશ્વરી । પ્રત્યગાસ્તે
વદન્તી યા સા માં પાતુ સરસ્વતી ॥ બ્લૂં ચોદયિત્રી સૂનૃતાનાં
ચેતન્તી સુમતીનામ્ । યજ્ઞં દધે સરસ્વતી ॥ ૪॥

મહો અર્ણ ઇતિ મન્ત્રસ્ય । મધુચ્છન્દ ઋષિઃ । ગાયત્રી છન્દઃ ।
સરસ્વતી દેવતા । સૌરિતિ બીજશક્તિઃ કીલકમ્ । મન્ત્રેણ ન્યાસઃ ।
અન્તર્યામ્યાત્મના વિશ્વં ત્રૈલોક્યં યા નિયચ્છતિ ।
રુદ્રાદિત્યાદિરૂપસ્થા યસ્યામાવેશ્ય તાં પુનઃ । ધ્યાયન્તિ
સર્વરૂપૈકા સા માં પાતુ સરસ્વતી । સૌઃ મહો અર્ણઃ
સરસ્વતી પ્રચેતયતિ કેતુના । ધિયો વિશ્વા વિરાજતિ ॥ ૫॥

ચત્વારિ વાગિતિ મન્ત્રસ્ય ઉચથ્યપુત્ર ઋષિઃ । ત્રિષ્ટુપ્ છન્દઃ ।
સરસ્વતી દેવતા । ઐમિતિ બીજશક્તિઃ કીલકમ્ । મન્ત્રેણ ન્યાસઃ ।
યા પ્રત્યગ્દૃષ્ટિભિર્જીવૈર્વ્યજ્યમાનાનુભૂયતે । વ્યાપિની
જ઼્ઞપ્તિરૂપૈકા સા માં પાતુ સરસ્વતી ॥ ઐં ચત્વારિ વાક્

પરિમિતા પદાનિ તાનિ વિદુર્બ્રાહ્મણા યે મનીષિણઃ । ગુહા ત્રીણિ
નિહિતા નેઙ્ગયન્તિ તુરીયં વાચો મનુષ્યા વદન્તિ ॥ ૬॥

યદ્વાગ્વદન્તીતિ મન્ત્રસ્ય ભાર્ગવ ઋષિઃ । ત્રિષ્ટુપ્ છન્દઃ ।
સરસ્વતી દેવતા । ક્લીમિતિ બીજશક્તિઃ કીલકમ્ । મન્ત્રેણ ન્યાસઃ ।
નામજાત્યાદિભિર્ભેદૈરષ્ટધા યા વિકલ્પિતા । નિર્વિકલ્પાત્મના
વ્યક્તા સા માં પાતુ સરસ્વતી ॥ ક્લીં યદ્વાગ્વદન્ત્યવિચેતનાનિ
રાષ્ટ્રી દેવાનાં નિષસાદ મન્દ્રા । ચતસ્ર ઊર્જં દુદુહે
પયાંસિ ક્વ સ્વિદસ્યાઃ પરમં જગામ ॥ ૭॥

દેવીં વાચમિતિ મન્ત્રસ્ય ભાર્ગવ ઋષિઃ । ત્રિષ્ટુપ્ છન્દઃ ।
સરસ્વતી દેવતા । સૌરિતિ બીજશક્તિઃ કીલકમ્ । મન્ત્રેણ ન્યાસઃ ।
વ્યક્તાવ્યક્તગિરઃ સર્વે વેદાદ્યા વ્યાહરન્તિ યામ્ । સર્વકામદુઘા
ધેનુઃ સા માં પાતુ સરસ્વતી ॥ સૌઃ દેવીં વાચમજનયન્ત
દેવાસ્તા વિશ્વરૂપાઃ પશવો વદન્તિ । સા નો મન્દ્રેષમૂર્જં
દુહાના ધેનુર્વાગસ્માનુપસુષ્ટુતૈતુ ॥ ૮॥

ઉત ત્વ ઇતિ મન્ત્રસ્ય બૃહસ્પતિરૃષિઃ । ત્રિષ્ટુપ્ છન્દઃ ।
સરસ્વતી દેવતા । સમિતિ બીજશક્તિઃ કીલકમ્ । મન્ત્રેણ ન્યાસઃ ।
યાં વિદિત્વાખિલં બન્ધં નિર્મથ્યાખિલવર્ત્મના । યોગી યાતિ
પરં સ્થાનં સા માં પાતુ સરસ્વતી ॥ સં ઉત ત્વઃ પશ્યન્ન
દદર્શ વાચમુત ત્વઃ શ્રુણ્વન્ન શ્રુણોત્યેનામ્ । ઉતો ત્વસ્મૈ
તન્વં૧ વિસસ્રે જાયેવ પત્ય ઉશતી સુવાસાઃ ॥ ૯॥

અમ્બિતમ ઇતિ મન્ત્રસ્ય ગૃત્સમદ ઋષિઃ । અનુષ્ટુપ્ છન્દઃ ।
સરસ્વતી દેવતા । ઐમિતિ બીજશક્તિઃ કીલકમ્ । મન્ત્રેણ ન્યાસઃ ।
નામરૂપાત્મકં સર્વં યસ્યામાવેશ્ય તાં પુનઃ ।
ધ્યાયન્તિ બ્રહ્મરૂપૈકા સા માં પાતુ સરસ્વતી ॥ ઐં અમ્બિતમે
નદીતમે દેવિતમે સરસ્વતી । અપ્રશસ્તા ઇવ સ્મસિ પ્રશસ્તિમમ્બ
નસ્કૃધિ ॥ ૧૦॥

ચતુર્મુખમુખામ્ભોજવનહંસવધૂર્મમ ।
માનસે રમતાં નિત્યં સર્વશુક્લા સરસ્વતી ॥ ૧॥

નમસ્તે શારદે દેવિ કાશ્મીરપુરવાસિનિ ।
ત્વામહં પ્રાર્થયે નિત્યં વિદ્યાદાનં ચ દેહિ મે ॥ ૨॥

અક્ષસૂત્રાઙ્કુશધરા પાશપુસ્તકધારિણી ।
મુક્તાહારસમાયુક્તા વાચિ તિષ્ઠતુ મે સદા ॥ ૩॥

કમ્બુકણ્ઠી સુતામ્રોષ્ઠી સર્વાભરણભૂષિતા ।
મહાસરસ્વતી દેવી જિહ્વાગ્રે સંનિવિશ્યતામ્ ॥ ૪॥

યા શ્રદ્ધા ધારણા મેધા વાગ્દેવી વિધિવલ્લભા ।
ભક્તજિહ્વાગ્રસદના શમાદિગુણદાયિની ॥ ૫॥

નમામિ યામિનીનાથલેખાલઙ્કૃતકુન્તલામ્ ।
ભવાનીં ભવસન્તાપનિર્વાપણસુધાનદીમ્ ॥ ૬॥

યઃ કવિત્વં નિરાતઙ્કં ભુક્તિમુક્તી ચ વાઞ્છતિ ।
સોઽભ્યર્ચ્યૈનાં દશશ્લોક્યા નિત્યં સ્તૌતિ સરસ્વતીમ્ ॥ ૭॥

તસ્યૈવં સ્તુવતો નિત્યં સમભ્યર્ચ્ય સરસ્વતીમ્ ।
ભક્તિશ્રદ્ધાભિયુક્તસ્ય ષણ્માસાત્પ્રત્યયો ભવેત્ ॥ ૮॥

તતઃ પ્રવર્તતે વાણી સ્વેચ્છયા લલિતાક્ષરા ।
ગદ્યપદ્યાત્મકૈઃ શબ્દૈરપ્રમેયૈર્વિવક્ષિતૈઃ ॥ ૯॥

અશ્રુતો બુધ્યતે ગ્રન્થઃ પ્રાયઃ સારસ્વતઃ કવિઃ ।
ઇત્યેવં નિશ્ચયં વિપ્રાઃ સા હોવાચ સરસ્વતી ॥ ૧૦॥

આત્મવિદ્યા મયા લબ્ધ્વા બ્રહ્મણૈવ સનાતની ।
બ્રહ્મત્વં મે સદા નિત્યં સચ્ચિદાનન્દરૂપતઃ ॥ ૧૧॥

પ્રકૃતિત્વં તતઃ સૃષ્ટં સત્ત્વાદિગુણસામ્યતઃ ।
સત્યમાભાતિ ચિચ્છાયા દર્પણે પ્રતિબિમ્બવત્ ॥ ૧૨॥

તેન ચિત્પ્રતિબિમ્બેન ત્રિવિધા ભાતિ સા પુનઃ ।
પ્રકૃત્યવચ્છિન્નતયા પુરુષત્વં પુનશ્ચ તે ॥ ૧૩॥

શુદ્ધસત્ત્વપ્રધાનાયાં માયાયાં બિમ્બિતો હ્યજઃ ।
સત્ત્વપ્રધાના પ્રકૃતિર્માયેતિ પ્રતિપાદ્યતે ॥ ૧૪॥

સા માયા સ્વવશોપાધિઃ સર્વજ્ઞસ્યેશ્વરસ્ય હિ ।
વશ્યમાયત્વમેકત્વં સર્વજ્ઞત્વં ચ તસ્ય તુ ॥ ૧૫॥

સાત્ત્વિકત્વાત્સમષ્ટિત્વાત્સાક્ષિત્વાજ્જગતામપિ ।
જગત્કર્તુમકર્તું વા ચાન્યથા કર્તુમીશતે ॥ ૧૬॥

યઃ સ ઈશ્વર ઇત્યુક્તઃ સર્વજ્ઞત્વાદિભિર્ગુણૈઃ ।
શક્તિદ્વયં હિ માયાયા વિક્ષેપાવૃતિરૂપકમ્ ॥ ૧૭॥

વિક્ષેપશક્તિર્લિઙ્ગાદિબ્રહ્માણ્ડાન્તં જગત્સૃજેત્ ।
અન્તર્દૃગ્દૃશ્યયોર્ભેદં બહિશ્ચ બ્રહ્મસર્ગયોઃ ॥ ૧૮॥

આવૃણોત્યપરા શક્તિઃ સા સંસારસ્ય કારણમ્ ।
સાક્ષિણઃ પુરતો ભાતં લિઙ્ગદેહેન સંયુતમ્ ॥ ૧૯॥

ચિતિચ્છાયાસમાવેશાજ્જીવઃ સ્યાદ્વ્યાવહારિકઃ ।
અસ્ય જીવત્વમારોપાત્સાક્ષિણ્યપ્યવભાસતે ॥ ૨૦॥

આવૃતૌ તુ વિનષ્ટાયાં ભેદે ભાતેઽપયાતિ તત્ ।
તથા સર્ગબ્રહ્મણોશ્ચ ભેદમાવૃત્ય તિષ્ઠતિ ॥ ૨૧॥

યા શક્તિસ્ત્વદ્વશાદ્બ્રહ્મ વિકૃતત્વેન ભાસતે ।
અત્રાપ્યાવૃતિનાશેન વિભાતિ બ્રહ્મસર્ગયોઃ ॥ ૨૨॥

ભેદસ્તયોર્વિકારઃ સ્યાત્સર્ગે ન બ્રહ્મણિ ક્વચિત્ ।
અસ્તિ ભાતિ પ્રિયં રૂપં નામ ચેત્યંશપઞ્ચકમ્ ॥ ૨૩॥

આદ્યત્રયં બ્રહ્મરૂપં જગદ્રૂપં તતો દ્વયમ્ ।
અપેક્ષ્ય નામરૂપદ્વે સચ્ચિદાનન્દતત્પરઃ ॥ ૨૪॥

સમાધિં સર્વદા કુર્યાધૃદયે વાથ વા બહિઃ ।
સવિકલ્પો નિર્વિકલ્પઃ સમાધિર્દ્વિવિધો હૃદિ ॥ ૨૫॥

દૃશ્યશબ્દાનુભેદેન સ વિકલ્પઃ પુનર્દ્વિધા ।
કામાદ્યાશ્ચિત્તગા દૃશ્યાસ્તત્સાક્ષિત્વેન ચેતનમ્ ॥ ૨૬॥

ધ્યાયદૃશ્યાનુવિદ્ધોઽયં સમાધિઃ સવિકલ્પકઃ ।
સ્વાનુભૂતિરસાવેશાદૃશ્યશબ્દાદ્યપેક્ષિતુઃ ॥ ૨૮॥

નિર્વિકલ્પઃ સમાધિઃ સ્યાન્નિવાન્તસ્થિતદીપવત્ ।
હૃદીવ બાહ્યદેશેઽપિ યસ્મિન્કસ્મિંશ્ચ વસ્તુનિ ॥ ૨૯॥

સમાધિરાદ્યસન્માત્રાન્નામરૂપપૃથક્કૃતિઃ ।
સ્તબ્ધીભાવો રસાસ્વાદાત્તૃતીયઃ પૂર્વવન્મતઃ ॥ ૩૦॥

એતૈઃ સમાધિભિઃ ષડ્ભિર્નયેત્કાલં નિરન્તરમ્ ।

દેહાભિમાને ગલિતે વિજ્ઞાતે પરમાત્મનિ ।
યત્ર યત્ર મનો યાતિ તત્ર તત્ર પરામૃતમ્ ॥ ૩૧॥

ભિદ્યતે હૃદયગ્રન્થિશ્છિદ્યન્તે સર્વસંશયાઃ ।
ક્ષીયન્તે ચાસ્ય કર્માણિ તસ્મિન્દૃષ્ટે પરાવરે ॥ ૩૨॥

મયિ જીવત્વમીશત્વં કલ્પિતં વસ્તુતો નહિ ।
ઇતિ યસ્તુ વિજાનાતિ સ મુક્તો નાત્ર સંશયઃ ॥ ૩૩॥

ઇત્યુપનિષત્ ॥

ૐ વાઙ્મે મનસિ પ્રતિષ્ઠિતા મનો મે વાચિ પ્રતિષ્ઠિત-
માવિરાવીર્મ એધિ ॥ વેદસ્ય મ આણીસ્થઃ શ્રુતં મે મા
પ્રહાસીરનેનાધીતેનાહોરાત્રાન્સન્દધામિ ઋતં વદિષ્યામિ
સત્યં વદિષ્યામિ તન્મામવતુ તદ્વક્તારમવત્વવતુ મામવતુ
વક્તારમવતુ વક્તારમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ સરસ્વતીરહસ્યોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi (sunderh@hotmail.com)

*Shri Sarasvatirahasya Upanishad*

pdf was typeset on January 10, 2019

Please send corrections to *sanskrit@cheerful.com*